न्धेन रूपसामानाधिकरण्याप्रसिद्धेरेव व्याप्तिलक्षणातिव्याप्तिविरहात् यद्धर्मेत्यत्र धर्मस्य साध्यतावच्छेदकसम्बंधावच्छिन्नाधिकरण
तानिरूपकतावच्छेदकत्वेनापि विशेषणीयत्वाद्वा न च वृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः तादृशसम्बन्धस्य प्रतियोगितानव
च्छेदकतया — तत्सम्बन्धावच्छिन्नत्वस्याप्रसिद्धेः तादृशसंबंधस्यापि प्रतियोगितावच्छेदकत्वपक्षएवैतन्निरुक्तत्वादरात् निरुक्तप्रतियो
गितासामान्ये यत्संबन्धातिरिक्तसंबन्धानवच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभाववत्तत्संबन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वमिति तु न युक्त
म् वृत्त्यनियामकसंबन्धेन साध्यतायां व्यभिचारिण्यतिव्याप्त्यापत्तेः यद्वा स्वावच्छेदकताघटकसंबन्धेन यादृशप्रतियोगितावच्छेदकानधि
करणं हेत्वधिकरणं तादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकत्व यत्सम्बन्धावच्छिन्नावच्छेदकताकत्वोभयाभाववत्तेन सम्बन्धे
न तद्धर्मावच्छिन्नस्य व्यापकत्वं विवक्षितम् वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वाभावेपि प्रतियोगितावच्छेदकताघटकसंम्ब
न्धत्वं सर्वसंमतमेव चैत्रो न पचतीत्यादौ वृत्त्यनियामकानुकूलत्वसम्बन्धेन पावकविशिष्टायाः कृतेरभावस्य चैत्रादावन्वयदर्शनात् व्यभि।
चारिणि तु साध्यवत्सामान्याभावप्रतियोगितायामेव तादृशोभयाभावविरहान्नातिव्याप्तिरिति तु नव्याः ननु व्याप्यवृत्तिसाध्यकस्थले युक्तक्र
मेणैव व्यापकत्वं निर्वाच्यम् अन्यथा दंडिमानित्यादौ दंडित्वादिप्रकारेण व्यापकत्वानुपपत्तेः तथा च प्रमेयवान्वाच्यत्वादित्यादावव्याप्तिः प्र
मेयत्वावच्छिन्नत्वस्याप्रसिद्धेः न च प्रकारित्वादौ तत्प्रसिद्धिः प्रतियोगितानिष्ठाया एवावच्छेद्यतायाः प्रकृते निवेशनीयत्वात् अन्यथा प्रक
रित्वप्रतियोगित्वसाधारणैकावच्छेद्यत्वविरहेण व्यभिचारिण्यतिव्याप्त्यापत्तेरत आह समवायेनेति ननु स्वरूपसम्बन्धेन गगनादेर्वृत्ति
मत्वेपि प्रकृतसाध्यीयसाध्यतावच्छेदकसम्बन्धसामान्येन तादृशोभयाभावविवक्षयैव सर्वसामंजस्ये कृतं विवक्षान्तरेण घटनान्महाकाल

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भयत्वेनद्रव्यंजानेरित्यादौनातिव्याप्तिरितियोजनाविरहेपिचेतिचकारस्तु प्रामादिक इति प्राञ्चः वस्तुतस्तु संयोगस्य संबंधमात्रस्य वह्नित्वावच्छिन्नप्रतियोगिकत्वाप्रत्तुः
जा॰सि॰ त्वादित्यत्र घटीयतादृशविशेषणतया पटत्वावच्छिन्नप्रतियोगिकत्वविरहेण पटाभावस्यैव प्रतियोगिवैयधिकरण्यसंभवात् कालः प्र
ल॰ मेयवान्महाकालत्वादित्यत्र च कालिकसम्बन्धेन प्रमेयसामान्यस्य व्याप्यवृत्तितया न तत्प्रतियोगिवैयधिकरण्यस्यैवानुपादेयत्वेन निर्दो
२५ षादतः पूर्वकल्पे दोषान्तरमाह। अत एवेति। यद्यपि संयोगमात्रस्यैव वह्नित्वावच्छिन्नप्रतियोगिकत्वविरहाद्वह्निधूमोभयत्वावच्छिन्नाभाव
मादायैव नातिव्याप्तिसंभावना तथापि वह्निधूमोभयवान्वह्नेरित्यादौ संयोगस्य वह्नित्वावच्छिन्नप्रतियोगिकत्वविरहेपि समवायस्यैकत्वे
नद्रव्यत्वप्रतियोगिकत्वगुणानुयोगिकत्वोप्रसिद्धावपीत्यर्थः तथा च संबन्धमात्रस्यैकप्रतियोगिकापरानुयोगिकसंबन्धत्वनियमेन वह्नि
धूमोभयत्वावच्छिन्नप्रतियोगिकसम्बन्धस्याप्रसिद्ध्या तादृशप्रतियोगिकत्वस्य लक्षणाघटकत्वेपि वह्निधूमोभयवान्वह्नेरित्यादौ नातिव्या
प्तिः प्रकारित्वादेः सम्बन्धत्वे मानाभावादिति तु प्रागेव प्रपञ्चितमस्माभिः केचित्तु वह्नेरित्यत्र धूमादिति नातिव्याप्तिरित्यनन्तरं चाव्याप्तिर्वे।
तिपाठं कल्पयन्तो द्रव्यं जानेरित्यादावतिव्याप्तिं वह्निधूमोभयवान् धूमादित्यत्र चाव्याप्तिमेव पूर्वलक्षणे दोषं संगमयन्ति ननु स्वरूपसंबन्धा
त्मकप्रतियोगित्वस्य विशिष्टधीजनकत्वरूपसंबन्धताघटकनियमघटितत्वात्तादात्म्यमत आह प्रतियोगित्वादिरिति आदिनावच्छेद
कत्वपरिग्रहः नसम्बंधेनेति प्रयोगितात्वादिधर्मान्तरप्रकारेण हेतुमन्निष्ठाभावीयत्वप्रकारेणैववात त्प्रवेशादिति भावः संयोगत्वादिनैवेति
ननु प्रतियोगितात्वमपि स्वरूपसम्बन्ध एवेत्युक्तदोषतादवस्थ्यम् किंच वृत्त्यनियामकसम्बन्धेन हेतुतास्थले तेन सम्बन्धेन हेतुसम्बन्धित्व
स्यावश्यं प्रवेश एवेत्यतः सम्बन्धत्वेन निवेशेपि न क्षतिरित्याशयेनाह दर्शितं चेति। विशेष्यविशेषणत्वान्यविशिष्टधीविषयत्वमेव संबन्धत्व रामः
मिति भावः भावभिन्नत्वरूपस्याभावत्वस्य प्रवेशे घटत्वाभाववान्द्रव्यत्वादित्यादावतिव्याप्तिरित्याह। अभावत्वं चेति। वृत्तिमत्त्वादि इदं च २५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्यन्तान्योन्याभावत्वयोरभावत्वागर्भतामभिप्रेत्य तयोस्तद्गर्भतायांत्वाह। तदपिवेति। अभावत्वमपिवेत्यर्थः। अपेरभावोर्थः। अतिरिक्तविषयतापक्षस्यकेनचित्स्वीकारात् दृष्टांततात्वादीतिविषयतात्वादीत्यर्थः आदिनाप्रकारित्वग्रहः। केचित्तु तत्वंतत्ता आदिनाचेदंत्वस्योपग्रहः। तत्वेदंत्वयोः पदार्थान्तरत्वंविनादुर्वचत्वात्तत्रैवपर्यवसानादित्याहुः तत्वेति प्रतियोगितात्वाधिकरणतात्वेत्यर्थः॥ ॐ ॥ ॥ इति जागदीश्यन्तर्गतसिद्धान्तलक्षणंसम्पूर्णम्॥ ॐ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीकाशीनिवासिना श्री गोवर्द्धनपालितेन बहुरसिकजनमनोविनोदाय॥ श्रीकाश्यांस्वकीय

इतिजागदीशीसिद्धान्तलक्षणंसमाप्तः

हरिहरयन्त्रालयेमुद्रितः पौष शुक्ल १५ संवत् १९४७ ॥ ❀ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri